# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** शास्त्री-**2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 6 - CC - 2.3.6** | **समयः - 8 तः 11** |
| **दिनाङ्कः- 15/10/2019** | **सन्दर्भग्रन्थः –** महाभारत वनपर्व - नलोपाख्यानपर्व | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 पद्यद्वयस्य ससन्दर्भं व्याख्या कार्या । 10**

1. निकृत्या निकृतिप्रज्ञा हन्तव्या इति निश्चयः ।
   न हि नैकृतिकं हत्वा निकृत्य पापमुच्यते ।।
2. हंसानां वचनं श्रुत्वा यथा मे नैषधोव्रतः ।
   पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ।।
3. विदर्भराजस्तत्र त्वां पूजयिष्यति मानद ।
   तेन त्वं पूजितो राजन् सुखं वत्स्यसिनो गृहे ।।

**प्र-2 हंसदमनयन्तीसंवादं सविस्तरं निरूपयत । 10**

**अथवा**

**नलवनयात्रायाः वर्णनं सविस्तरं कुरुत ।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 पद्यद्वयस्य ससन्दर्भं व्याख्या कार्या । 10**

1. आदित्या वसवो रुद्रा अश्विनौ समरुद्गणौ ।
   रक्षन्तु त्वां महाभागे धर्मेणासि समावृता ।।
2. भक्ताहमपि तं वीरं छायेवानुगता पथि ।
   तस्य दैवात् प्रसङ्गोऽभूदतिमात्रं सुदेवने ।।
3. अथ दीर्घस्य कालस्य पर्णादो नाम वै द्विजः ।
   प्रत्येत्यं नगरं भैमीमिदं वचनमब्रवीत् ।।

**प्र-4 नलविलापं यथाग्रन्थं निरूपयत । 10**

**अथवा**

**दमयन्तिसुदेवसंवादं सविस्तरं लिखत ।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 पद्यद्वयं ससन्दर्भं व्याख्यायताम् । 10**

1. सर्वः सर्वं न जानाति सर्वज्ञ: नास्ति कश्चन ।

नैकत्र परिनिष्ठाति ज्ञानस्य पुरुषे क्वचित् ।।

2. सैवं समेत्य व्यपनीय तन्द्रां शान्तज्वरा हर्षविवृद्धसत्वा ।
   रराज भैमी समवाप्तकामा शीतांशुना रात्रिरिवोदितेन ।।
3. यथा धनंजयः पार्थस् तपस्वी नियतव्रतः ।
   मुनिरेकचरः श्रीमान् धर्मो विग्रहवानिव ।।

**प्र-6 कस्याप्यैकस्य सविस्तरमुत्तरं लिखत। 10**

**1. कलिनिर्गमनं सविस्तरं निरूपयत।**

**अथवा**

**2. नलदमयन्तिसमागमवर्णनं कुरुत।**

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत। 10**

1. भरतर्षभः कः आसीत्
2. राज्ञः नलस्य पितुः नाम किम्
3. भैमी अर्थात् का:
4. मघवन् कस्य अपरं नाम
5. नलस्य राज्यं केन हृतम्
6. निषधराजः कः आसीत्
7. बाहुकः कः अवर्तत
8. कः पुण्यश्लोकः प्रोक्तः
9. नलोपाख्यानं कः कस्मै कथयति
10. कैशिनी का अस्ति
11. महाभारतस्य रचयिता कः
12. नलस्य भ्राता कः आसीत्
13. युधिष्ठिरः कस्य वियोगरतः
14. अक्षहृदय - शब्दस्य कोऽर्थः
15. नलोपाख्याने कति अध्यायाः

*****************